# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – ५** | **गुणाः – ५०** |
| **विषयः – धर्मशास्त्रम्** | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १७/०७/२०२१** | **सन्दर्भग्रन्थः – विदुरनीतिः १-८ अध्यायाः** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत।**

१ निषेवते प्रशस्तानि निन्दितानि न सेवते।
अनास्तिकः श्रद्दधान एतत् पण्डितलक्षणम्॥

२ ना प्राप्यमभिवाञ्छन्ति नष्टं नेच्छति शोचितुम्।
आपत्सु च न मुह्यन्ति नराः पण्डितबुद्धयः॥

३ तत्त्वज्ञः सर्वभूतानां योगज्ञः सर्वकर्मणाम्।
उपायज्ञो मनुष्याणां नरः पण्डित उच्यते॥

४ न देवा दण्डमादाय रक्षन्ति पशुपालवत्।
यं तु रक्षितुमिच्छन्ति बुद्ध्या संविभजन्ति तम्॥

**प्रश्नः** २ विदुरनीतिग्रन्थोक्तानि मूर्खजनलक्षणानि वर्णयत।

**प्रश्नः** ३ समाजस्य उत्कर्षाय विदुरनीतेः उपयोगितां वर्णयत।

**प्रश्नः** ४ प्रथमाध्यायस्य कथासारं सङ्क्षेपेण वर्णयत।

**प्रश्नः** ५ ग्रन्थाधारेण विदुर-धृतराष्ट्रयोः संवादसारं लिखत।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ ऋषीणां च नदीनां च कुलानां च महात्मनाम्।
प्रभवो नाधिगन्तव्यः स्त्रीणां दुश्चरितस्य च॥

२ मर्माण्यस्थीनि हृदयं तथा सून् रुक्षा वाचो निर्दहन्तीह पुंसाम्।
तस्माद् वाचमुषतीमुग्ररूपां धर्मारामो नित्यशो वर्जयीत॥

३ देवद्रव्यविनाशेन ब्रह्मस्वहरणेन च ।
कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च ॥

४ आपदर्थे धनं रक्षेद् दारान् रक्षेद् धनैरपि ।
आत्मानं सततं रक्षेद् दारैरपि धनैरपि ॥

**प्रश्नः ७** विदुरनीत्यनुसारं तापसलक्षणानि यथाग्रन्थं वर्णयत ।

**प्रश्नः ८** विदुरनीत्यनुसारं महाकुललक्षणानि चर्चयत ।

**प्रश्नः ९** विदुरनीतिग्रन्थोक्तानि भिक्षुकलक्षणानि प्रतिपादयत ।

**प्रश्नः १०** विदुरनीत्यनुसारं वर्णधर्मान् वर्णयत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ सन्तापात् किं भ्रश्यते ?
२ आपदर्थे किं रक्षेद् ?
३ धर्मस्य मार्गः कतिविधः ?
४ रुक्षावाचः कान् दहन्ति ?
५ कुलानि अकुलतां कदा यान्ति ?
६ सतां गेहेषु किं किं न उच्छिद्यन्ते ?
७ युधिष्ठिरः कस्य पुत्रः ?
८ शकुनिः कस्य पुत्रः ?
९ धृतराष्ट्रः कस्य पुत्रः ?
१० स्वर्गस्य सोपानं किम् ?
११ न्यायार्जितस्य द्रव्यस्य कः उपयोगः ?
१२ कौ द्वौ सूर्यमण्डलभेदिनौ ?
१३ नरकद्वाराणि किं किम् अस्ति ?
१४ चिकित्सकाः कथं जीवन्ति ?
१५ राज्ञां बलं किमुच्यते ?

****